# Shri Dattatreya Stotram 7

# શ્રીદત્તાત્રેયસ્તોત્રમ્ ૭

## Document Information

Text title : Shri Dattatreya Stotram 7

File name : dattAtreyastotram7.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયસ્તોત્રમ્ ૭

દત્તાત્રેયં મહાત્માનં વરદં ભક્તવત્સલમ્ ।
પ્રપન્નાર્તિહરં વન્દે સ્મર્તૃગામી સ માऽવતુ ॥ ૧॥

દીનબન્ધું કૃપાસિન્ધું સર્વકારણકારણમ્ ।
સર્વરક્ષાકરં વન્દે સ્મર્તૃગામી સ માऽવતુ ॥ ૨॥

શરણાગતદીનાર્તપરિત્રાણપરાયણમ્ ।
નારાયણં વિભું વન્દે સ્મર્તૃગામી સ માऽવતુ ॥ ૩॥

સર્વાનર્થહરં દેવં સર્વમઙ્ગલમઙ્ગલમ્ ।
સર્વક્લેશહરં વન્દે સ્મર્તૃગામી સ માऽવતુ ॥ ૪॥

શોષણં પાપપઙ્કસ્ય દીપનં જ્ઞાનતેજસઃ ।
ભક્તાભીષ્ટપ્રદં વન્દે સ્મર્તૃગામી સ માऽવતુ ॥ ૫॥

સર્વરોગપ્રશમનં સર્વપીડાનિવારણમ્ ।
તાપપ્રશમનં વન્દે સ્મર્તૃગામી સ માऽવતુ ॥ ૬॥

બ્રહ્મણ્યં ધર્મતત્ત્વજ્ઞં ભક્તકીર્તિવિવર્ધનમ્ ।
આપદુદ્ધરણં વન્દે સ્મર્તૃગામી સ માऽવતુ ॥ ૭॥

જન્મસંસારબન્ધઘ્નં સ્વરૂપાનન્દદાયકમ્ ।
નિઃશ્રેયસપ્રદં વન્દે સ્મર્તૃગામી સ માऽવતુ ॥ ૮॥

જયલાભયશઃકામદાતુર્દત્તસ્ય યઃ સ્તવમ્ ।
ભોગમોક્ષપ્રદસ્યેમં પ્રપઠેત્સ કૃતી ભવેત્ ॥ ૯॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીદત્તાત્રેયસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Dattatreya Stotram 7*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*